# संस्कृतम्

## (309)

## शिक्षक-अंकितमूल्यांकनपत्रम्- I

## (पाठाः प्रथमतः दशमपर्यन्तम्)

पूर्णाङ्काः 25

**निर्देशाः**

(i) सर्वे प्रश्नाः अनिवार्याः। सर्वेषां प्रश्नानाम् अङ्काः समानाः।

(ii) उत्तरपुस्तिकायां प्रथमपृष्ठे स्वनाम, अनुक्रमाङ्कसंख्या, शिक्षणकेन्द्रस्य नाम, विषयस्य नाम इति सर्वं लेखनीयम्।

1. कयोश्चित् द्वयोः प्रश्नयोः उत्तरं प चाशत्शब्देषु (50) लिखत–

   (क) 'जीवनसन्देशः' इति पाठात् प च शिक्षाः चित्वा लिखत। भवान् ताः जीवने कथं पालयिष्यति?

   (ख) द्वितीये पाठे प्रहेलिकाः पठित्वा तथैव अन्याः तिस्र प्रहेलिकाः कस्मादपि ग्रन्थात् पत्रिकायाः वा संग ह्य लिखत अर्थ च स्पष्टयत।

   (ग) आरोग्यार्थं किं किम् अपेक्षितम् इति प च वाक्येषु लिखत।

2. कयोश्चित् द्वयोः प्रश्नयोः उत्तरं प चाशत्शब्देषु (50) लिखत–

   (क) 'वाचां मण्डनं सत्यम्' इति पाठे के प च प्रश्नाः भवद्भ्यः रोचन्ते? तानि चित्वा तेषाम् उत्तराणि लिखत। किं तेषां प्रश्नानाम् अन्यानि उत्तराणि अपि भवितुं शक्यन्ते? तानि अपि लिखत।

   (ख) 'अतिलोभः न कर्तव्यः' इति पाठात् चक्रधरस्य चरित्रं वर्णयित्वा कस्यचिदन्यस्य लुब्धस्य पात्रस्य उदाहरणं पाठ्यपुस्तकात् जीवनात् वा दीयताम्।

   (ग) 'राजते खलु कन्याकुमारी' इति पाठात् विविधविभक्तिषु प्रयुक्तानाम् ईकारान्तपदानां चयनं कृत्वा स्ववाक्येषु प्रयोगं कुरुत।

3. कमपि एकं प्रश्नं दशवाक्येषु /(200 शब्देषु) उत्तरत–

   (क) 'एतद् उपास्यम्' इति पाठात् दश उपदेशान् चित्वा जीवने तेषामुपयोगितां प्रदर्शयत।

   (ख) 'परार्थे आत्मोत्सर्गः' इति पाठात् क्त्वा/ल्यप् प्रत्यययुक्तानि पदानि चित्वा स्ववाक्येषु प्रयोगं कुरुत।

4. कमपि एकं प्रश्नं दशवाक्येषु (200 शब्देषु) उत्तरत–

   (क) 'काले फलति सौभाग्यम्' इति पाठात् सर्वाणि सम्बोधनपदानि चित्वा तेषां प्रथमान्तरूपं स्ववाक्येषु प्रयोजयत।

   (ख) 'पतन्ति परपीडकाः' इति नाटकात् आत्मानं कृष्णं मत्वा स्वक्रियाकलापान् वर्णयत।

5. **परियोजनाकार्यम्**

   (क) पाठ्यपुस्तके 'पतन्ति परपीडकाः' नाट्यात्मकं पाठं कथारूपे परिवर्त्य लिखत।

   **अथवा**

   (ख) कानिचित् कृत्प्रत्ययान्तानि (क्त्वा–ल्यप् तुमुन्–तव्यत् आदीनि) प चविंशतिपदानि पाठ्यपुस्तकात् चित्वा प्रत्ययक्रमेण लिखत।

# संस्कृतम्

## (309)

## शिक्षक-अंकितमूल्यांकनपत्रम्- II

## (पाठाः एकादशतः विंशतिपर्यन्तम्)

पूर्णाङ्काः 25

**निर्देशाः**

(i) सर्वे प्रश्नाः अनिवार्याः। सर्वेषां प्रश्नानाम् अङ्काः समानाः।

(ii) उत्तरपुस्तिकायां प्रथमपृष्ठे स्वनाम, अनुक्रमाङ्कसंख्या, शिक्षणकेन्द्रस्य नाम, विषयस्य नाम इति सर्वं लेखनीयम्।

1. कयोश्चित् द्वयोः प्रश्नयोः उत्तरं प चाशत्शब्देषु (50) लिखत–

(क) समाचारपत्रात् चित्रद्वयम् उद्ध त्य प्रतिचित्रमाध त्य अनुच्छेदं लिखत।

(ख) द्वितीयपुस्तके कामपि कथां स्वीकृत्य संवादरूपेण लिखत।

(ग) भवान् नगरे वसति। तत्र यदि वर्षा भवति तदा भवता किं किं द्रष्टुं शक्यते कि च न इति 'वर्षर्तुवर्णनम्' पाठात् तुलनां कृत्वा लिखत।

2. कयोश्चित् द्वयोः प्रश्नयोः उत्तरं प चाशत्शब्देषु (50) लिखत–

(क) 'अम तस्य पन्थाः' इति पाठं पठित्वा वर्तमानसमये समाजस्य अवस्था कीद शी भवेत् इति वर्णयत।

(ख) 'हिमालयो नाम नगाधिराजः' इति पाठात् दश उपमेयपदानि उपमानपदानि च चित्वा लिखत।

(ग) 'मानो हि महतां धनम्' इति पाठम् आध त्य श्र गालस्य चरित्रचित्रणं कुरुत।

3. कमपि एकं प्रश्नं दशवाक्येषु (200 शब्देषु) उत्तरत–

(क) 'कल्पनाकीर्तिः विजयते' इति पाठे प्रयुक्तानि सर्वनामपदानि चित्वा तानि केभ्यः प्रयुक्तानि इति लिखत।

(ख) 'पर्यावरणसंरक्षणम्' इति पाठं पठित्वा भवान् स्व–उपनगरस्य पर्यावरणं संरक्षितुं किं किं करिष्यति इति लिखत।

4. कमपि एकं प्रश्नं दशवाक्येषु (200 शब्देषु) उत्तरत–

(क) आत्मानं सरस्वतीं मत्वा दुर्वाससः शापात् अनुभूतां मनोव्यथां वर्णयत।

(ख) 'अनन्तः ज्ञानसागरः' इति पाठे प्रदर्शितानां दशविशिष्टग्रन्थानां नामानि लिखित्वा तेषामेव विषयस्य आधुनिककाले रचितानां ग्रन्थानां नामानि लिखत।

5. **परियोजनाकार्यम्**

(क) स्वनगरे स्थितां कामप्येकां विशिष्टसंस्कृतसंस्थाम् आध त्य तस्याः विवरणं, कार्यशैलीं समाजस्य कृते योगदानं च लिखत।

**अथवा**

(ख) प्रत्येकं वेदस्य एकम् मन्त्रम् अर्थसहितं लिखत। केन–ईशोपनिषदः वा मन्त्रचतुष्टयम् अर्थसहितं लिखत।

# संस्कृतम्

## (309)

## शिक्षक-अंकितमूल्यांकनपत्रम्- III

## (पाठाः- एकविशंतितः प चविंशतिपर्यन्तम्)

## (वैकलिपकपाठ्यक्रमः- षड्विंशतितः त्रिंशत्पर्यन्तम्)

पूर्णाङ्काः 25

**निर्देशाः**

(i) सर्वे प्रश्नाः अनिवार्याः। सर्वेषां प्रश्नानाम् अङ्काः समानाः।

(ii) उत्तरपुस्तिकायां प्रथमपृष्ठे स्वनाम, अनुक्रमांङ्कसंख्या, शिक्षणकेन्द्रस्य नाम, विषयस्य नाम इति सर्वं लेखनीयम्।

1. कयोश्चित् द्वयोः प्रश्नयोः उत्तरं प चाशत्शब्देषु (50) लिखत–

(क) प्राचीनकाले प्रयुक्तानां शल्यशस्त्राणां वैशिष्ट्यं वर्णयत।

(ख) चारुदत्तस्य चरित्रचित्रणं कृत्वा आधुनिकसमाजे धनलुब्धैः सह तस्य तुलनां कुरुत।

(ग) 'हृदयपरिवर्तनम्' इति नाटकस्य विषयवस्तु आध त्य भगवतः बुद्धस्य पूर्वजन्मनः कामपि अन्यां कथां लिखत।

2. कस्यचिदेकस्य प्रश्नस्य उत्तरं प चाशत्शब्देषु (50) लिखत–

(क) राष्ट्रीयमुक्तविद्यालयीशिक्षासंस्थानस्य निदेशकं प्रति द्वादशकक्षायाः पाठ्यक्रममधिकृत्य संस्कृतभाषायां स्वविचारान् प्रकटीकुरुत।

(ख) परियोजनालेखने निबन्धलेखने च कः भेदः भवति इति प चवाक्येषु लिखत।

**वैकल्पिकपाठ्यक्रमः (विकल्पः क)**

**संस्कृतं संस्कृतिश्च**

**(पाठाः षड्विंशतितः एकोनविंशतिपर्यन्तम्)**

3. कस्यचिदेकस्य प्रश्नस्य उत्तरं दशवाक्येषु/(200 शब्देषु) लिखत–

(क) आधुनिकसंस्कृतसाहित्ये प च नाटकसंग्रहाणां प चकाव्यसंग्रहाणां नामानि लिखत।

(ख) 'भारतस्य ज्ञान–विज्ञान परम्परा' इति पाठम् अधिकृत्य केषा चन दशग्रन्थानां समक्षम् आधुनिकवैज्ञानिकलेखकानां नामानि लिखत।

**वैकल्पिक पाठ्यक्रमः (विकल्पः ख)**

**प्रयोजनमूलकसंस्कृतम्**

**(पाठाः षड्विंशतितः त्रिंशत्पर्यन्तम्)**

(क) दूरदर्शनात्/आकाशवाणीतः प च संस्कृतवार्ताकार्यक्रमान् श्रुत्वा तेषां प्रमुखविषयान् लिखत।

(ख) कामपि एकां संस्कृतपत्रिकां क्रीत्वा तस्याः प्रमुखविषयान् उद्धरत।

4. कस्यचिदेकस्य प्रश्नस्य उत्तरं दशवाक्येषु (200 शब्देषु) उत्तरत–

(क) हिन्दीभाषातः संस्कृतस्य दश तत्समशब्दान् लिखत।

(ख) वर्तमानकाले षोडशसंस्कारेषु प्रायः कः कः संस्कारः प्रयुज्यते? पाश्चात्यसभ्यतायां तेषामभावेन काः समस्याः प्रादुर्भवन्ति?

**अथवा**

(क) पत्रिका–समाचारपत्रयोः तुलनां कृत्वा पत्रिकायाः प चवैशिष्ट्यानि लिखत।

(ख) मुद्रणत्रुटिसंशोधनार्थं प्रयुक्तानां कानिचित् प च चिह्नानि सोदाहरणानि प्रस्तूयन्ताम्।

5. **परियोजनाकार्यम्**

(क) कस्यचिदेकस्य प्रसिद्धसंस्कृतविदुषः साक्षात्कारं कृत्वा तस्य व्यक्तित्वं कृतित्व च प्रकाशयत।

**अथवा**

(ख) दूरदर्शनतः आकाशवाणीतः च प्रसारितानां संस्कृत कार्यक्रमाणां सूचीं निर्माय भवद्भ्यः कः कार्यक्रमः सर्वाधिकं रोचते किमर्थ च इति विस्तरेण लिखत।